# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्री (SEM-1) | **प्रश्नपत्रम्**–५ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड**- **CC- 1-1-1** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १९/१२/२०१८ | **सन्दर्भग्रन्थः**– भागवतमाहात्म्यम् – भागवते प्रथमस्कन्धश्च । | |

---

**॥ प्रथमान्वितिः ॥**

**प्र–१ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. सदा वैकुण्ठनिलया हरिकीर्तनतत्पराः ।
लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ॥

२. मनोरथो मदीयोऽयं सफलः सर्वथा त्वया ।
निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥

३. तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ।
सेनाच्छ्रवणापाठाद्दर्शनात्पापनाशिनी ॥

**प्र–२ देवर्षिनारदेन कृतं भक्तिदेव्याः कष्टनिवारणकथां सविस्तरं लिखत । १०**

**अथवा**

**सप्ताहयज्ञस्य विधिं यथाग्रन्थं प्रतिपादयत ।**

**॥ द्वितीयान्वितिः ॥**

**प्र–३ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या । १०**

१. भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥

२. यस्यां वै श्रूयमाणायां कृष्णे परमपुरुषे ।
भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥

३. पाहि पाहि महायोगिन्देवदेव जगत्पते ।
नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥

**प्र–४ भगवतः विविधावताराणां कथा यथाग्रन्थं वर्णयत । १०**

**अथवा**

**अश्वत्थाम्नः दुष्कृत्यं विवर्ण्य कुन्त्या कृता भगवत्स्तुतिं वर्णयत ।**

## ॥ तृतीयान्वितिः ॥

**प्र-५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **१०**

१. यथा क्रीडोपस्कराणां संयोगविगमाविह ।
इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥

२. यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ।
तदाहरेवाप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्तत ॥

३. मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥

**प्र-६ विदूरेण प्रदत्तः गान्धारीधृतराष्ट्राभ्यां समुपदेशं वर्णयत ।** **१०**

**अथवा**

**धर्मपृथ्व्योः संवादं विलिख्य परीक्षिते प्रदत्तस्य शापस्य कथां लिखत ।**

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशानां लघूत्तराणि लिखत ।** **१०**

१. शृङ्गिऋषे आश्रमः कस्याः नद्याः तटे आसीत्?
२. परीक्षितः मातुः नाम किम्?
३. भीष्मस्तुतौ कति श्लोकाः सन्ति?
४. द्वारिका – शब्दस्य कोऽर्थः ?
५. नारदः कस्य असन्तोषं निवारयति?
६. सनत्कुमाराणां नामानि लिखत ।
७. भक्त्याः दासी का?
८. दृष्टान्तः कुशलः कः भवितव्यः ?
९. आत्मदेवस्य पत्न्याः नाम किम्?
१०. ब्रह्मास्त्रं वारयितुं कः न जानाति?
११. भागवते कति श्लोकाः सन्ति?
१२. द्रोणाचार्यस्य पत्न्याः नाम किम्?
१३. अमृतकुम्भं गृहीत्वा के समागच्छन्ति?
१४. परीक्षित् शब्दस्य षष्ठी एकवचनं किम्?
१५. गोकर्णगीतायां कति श्लोकाः सन्ति?

--००--